# rakArAdi shrI parashurAmAShTottarashatanAmastotram

# રકારાદિ શ્રીપરશુરામાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : rakArAdi parashurAmAShTottarashatanAmastotram

File name : rakArAdiparashurAma108nAmastotram.itx

Category : aShTottarashatanAma, vishhnu, dashAvatAra, paNDita-bellaMkoNDa-rAmarAya-kavIndra, vishnu

Location : doc_vishhnu

Author : paNDita shrI bellaMkoNDa rAmarAya kavIndra

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : shrI dashAvatArAShTottara shatanAmAvaliH savyAkhyA

Latest update : January 24, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# રકારાદિ શ્રીપરશુરામાષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રી હયગ્રીવાય નમઃ ।

હરિઃ ૐ

રામો રાજાટવીવહ્નિ રામચન્દ્રપ્રસાદકઃ ।
રાજરક્તારુણસ્નાતો રાજીવાયતલોચનઃ ॥ ૧॥

રૈણુકેયો રુદ્રશિષ્યો રેણુકાચ્છેદનો રથી ।
રણધૂતમહાસેનો રુદ્રાણીધર્મપુત્રકઃ ॥ ૨॥

રાજત્પરશુવિચ્છિન્નકાર્તવીર્યાર્જુનદ્રુમઃ ।
રાતાખિલરસો રક્તકૃતપૈતૃકતર્પણઃ ॥ ૩॥

રત્નાકરકૃતાવાસો રતીશકૃતવિસ્મયઃ ।
રાગહીનો રાગદૂરો રક્ષિતબ્રહ્મચર્યકઃ ॥ ૪॥

રાજ્યમત્તક્ષત્રબીજ ભર્જનાગ્નિપ્રતાપવાન્ ।
રાજદ્ભૃગુકુલામ્બોધિચન્દ્રમા રઞ્જિતદ્વિજઃ ॥ ૫॥

રક્તોપવીતો રક્તાક્ષો રક્તલિપ્તો રણોદ્ધતઃ ।
રણત્કુઠારો રવિભૂદણ્ડાયિત મહાભુજઃ ॥ ૬॥

રમાનાથધનુર્ધારી રમાપતિકલામયઃ ।
રમાલયમહાવક્ષા રમાનુજલસન્મુખઃ ॥ ૭॥

રસૈકમલ્લો રસનાડવિષયોદ્દણ્ડ પૌરુષઃ ।
રામનામશ્રુતિસ્રસ્તક્ષત્રિયાગર્ભસઞ્ચયઃ ॥ ૮॥

રોષાનલમયાકારો રેણુકાપુનરાનનઃ ।
રાધેયચાતકામ્ભોદો રુદ્ધચાપકલાપગઃ ॥ ૯॥

રાજીવચરણદ્વન્દ્વચિહ્નપૂતમહેન્દ્રકઃ ।
રામચન્દ્રન્યસ્તતેજા રાજશબ્દાર્થનાશનઃ ॥ ૧૦॥

રાદ્ધદેવદ્વિજવ્રાતો રોહિતાશ્વાનનાર્ચિતઃ ।
રોહિતાશ્વદુરાધર્ષો રોહિતાશ્વપ્રપાવનઃ ॥ ૧૧॥

રામનામપ્રધાનાર્ધો રત્નાકરગભીરધીઃ ।
રાજન્મૌઞ્જીસમાબદ્ધ સિંહમધ્યો રવિદ્યુતિઃ ॥ ૧૨॥

રજતાદ્રિગુરુસ્થાનો રુદ્રાણીપ્રેમભાજનમ્ ।
રુદ્રભક્તો રૌદ્રમૂર્તી રુદ્રાધિકપરાક્રમઃ ॥ ૧૩॥

રવિતારાચિરસ્થાયી રક્તદેવર્ષિભાવનઃ ।
રમ્યો રમ્યગુણો રક્તો રાતભક્તાખિલેપ્સિતઃ ॥ ૧૪॥

રચિતસ્વર્ણસોપાનો રન્ધિતાશયવાસનઃ ।
રુદ્ધપ્રાણાદિસઞ્ચારો રાજદ્બ્રહ્મપદસ્થિતઃ ॥ ૧૫॥

રત્નસૂનુમહાધીરો રસાસુરશિખામણિઃ ।
રક્તસિદ્ધી રમ્યતપા રાતતીર્થાટનો રસી ॥ ૧૬॥

રચિતભ્રાતૃહનનો રક્ષિતભાતૃકો રણી ।
રાજાપહૃતતાતેષ્ટિધેન્વાહર્તા રસાપ્રભુઃ ॥ ૧૭॥

રક્ષિતબ્રાહ્મ્યસામ્રાજ્યો રૌદ્રાણેયજયધ્વજઃ ।
રાજકીર્તિમયચ્છત્રો રોમહર્ષણવિક્રમઃ ॥ ૧૮॥

રાજશૌર્યરસામ્ભોધિકુમ્ભસમ્ભૂતિસાયકઃ ।
રાત્રિન્દિવસમાજાગ્ર ત્પ્રતાપગ્રીષ્મભાસ્કરઃ ॥ ૧૯॥

રાજબીજોદરક્ષોણીપરિત્યાગી રસાત્પતિઃ ।
રસાભારહરો રસ્યો રાજીવજકૃતક્ષમઃ ॥ ૨૦॥

રુદ્રમેરુધનુર્ભઙ્ગ ક્રુદ્ધાત્મા રૌદ્રભૂષણઃ ।
રામચન્દ્રમુખજ્યોત્સ્નામૃતક્ષાલિતહૃન્મલઃ ॥ ૨૧॥

રામાભિન્નો રુદ્રમયો રામરુદ્રો ભયાત્મકઃ ।
રામપૂજિતપાદાબ્જો રામવિદ્વેષિકૈતવઃ ॥ ૨૨॥

રામાનન્દો રામનામો રામો રામાત્મનિર્ભિદઃ ।
રામપ્રિયો રામતૃપ્તો રામગો રામવિશ્રમઃ ॥ ૨૩॥

રામજ્ઞાનકુઠારાત્ત રાજલોકમહાતમાઃ ।
રામાત્મમુક્તિદો રામો રામદો રામમઙ્ગલઃ ॥ ૨૪॥

મઙ્ગલં જામદગ્ન્યાય કાર્તવીર્યાર્જુનચ્છિદે ।
મઙ્ગલં પરમોદાર સદા પરશુરામ તે ॥ ૨૫॥

મઙ્ગલં રાજકાલાય દુરાધર્ષાય મઙ્ગલમ્ ।
મઙ્ગલં મહનીયાય જામદગ્ન્યાય મઙ્ગલમ્ ॥ ૨૬॥

જમદગ્નિ તનૂજાય જિતાખિલમહીભૃતે ।
જાજ્વલ્યમાનાયુધાય જામદગ્ન્યાય મઙ્ગલમ્ ॥ ૨૭॥

॥ ઇતિ રામેણકૃતં પરાભવાબ્દે વૈશાખશુદ્ધ ત્રિતીયાયાં
પરશુરામ જયન્ત્યાં રકારાદિ શ્રી પરશુરામાષ્ટોત્તરશતમ્
શ્રી હયગ્રીવાય સમર્પિતમ્ ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

Source Book:
shrI dashAvatArAShTottarashatanAmAvaliH savyAkhyA
language: Telugu
Composed by : paNDita shrI bellaMkoNDa rAmarAya kavIndra

---

*rakArAdi shrI parashurAmAShTottarashatanAmastotram*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*